॥ वाल्मीकि रामायण॥

१ बालकाण्ड

अध्याय ६२

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम् ।
अभ्यागच्छन्सुराः सर्वे तपःफलचिकीर्षवः ॥ १॥

अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः ।
ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २॥

तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ।
विश्वामित्रो महातेजा भूयस्तेपे महत्तपः ॥ ३॥

ततः कालेन महता मेनका परमाप्सराः ।
पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४॥

तां ददर्श महातेजा मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५॥

दृष्ट्वा कन्दर्पवशगो मुनिस्तामिदमब्रवीत् ।
अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे ।
अनुगृह्णीष्व भद्रं ते मदनेन सुमोहितम् ॥ ६॥

इत्युक्ता सा वरारोहा तत्रावासमथाकरोत् ।
तपसो हि महाविघ्नो विश्वामित्रमुपागतः ॥ ७॥

तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च राघव ।
विश्वामित्राश्रमे सौम्य सुखेन व्यतिचक्रमुः ॥ ८॥

अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ।
सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः ॥ ९॥

बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ।
सर्वं सुराणां कर्मैतत्तपोऽपहरणं महत् ॥ १०॥

अहोरात्रापदेशेन गताः संवत्सरा दश ।
काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः ॥ ११॥

विनिःश्वसन्मुनिवरः पश्चात्तापेन दुःखितः ॥ १२॥

भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थिताम् ।
मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ।

उत्तरं पर्वतं राम विश्वामित्रो जगाम ह ॥ १३॥

स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ।
कौशिकीतीरमासाद्य तपस्तेपे सुदारुणम् ॥ १४॥

तस्य वर्षसहस्रं तु घोरं तप उपासतः ।
उत्तरे पर्वते राम देवतानामभूद्भयम् ॥ १५॥

अमन्त्रयन्समागम्य सर्वे सर्षिगणाः सुराः ।
महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः ॥ १६॥

देवतानां वचः श्रुत्वा सर्वलोकपितामहः ।
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ॥ १७॥

महर्षे स्वागतं वत्स तपसोग्रेण तोषितः ।
महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ॥ १८॥

ब्रह्मणः स वचः श्रुत्वा विश्वामित्रस्तपोधनः ।
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥ १९॥

ब्रह्मर्षि शब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ।
यदि मे भगवानाह ततोऽहं विजितेन्द्रियः ॥ २०॥

तमुवाच ततो ब्रह्मा न तावत्त्वं जितेन्द्रियः ।
यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः ॥ २१॥

विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ।
ऊर्ध्वबाहुर्निरालम्बो वायुभक्षस्तपश् चरन् ॥ २२॥

धर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ।
शिशिरे सलिलस्थायी रात्र्यहानि तपोधनः ॥ २३॥

एवं वर्षसहस्रं हि तपो घोरमुपागमत् ।
तस्मिन्सन्तप्यमाने तु विश्वामित्रे महामुनौ ॥ २४॥

सम्भ्रमः सुमहानासीत्सुराणां वासवस्य च ।
रम्भामप्सरसं शक्रः सह सर्वैर्मरुद्गणैः ॥ २५॥

उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com